# श्रीमद्वेदान्तदेशिकानां भाषाप्रभुत्वम्

प. रामानुजः, बेंगलूरु

आविष्णोरभिवन्द्यादावाचार्याणां परम्पराम् । वेदाचार्यान् पितॄन् स्वांश्च पराङ्कुशसदाह्वयान् ॥

वात्स्यरामानुजार्येण तैत्तिरीयमधीयता । वेदान्ताचार्यसूक्तीनां माहात्म्यं किञ्चिदीर्यते ॥

विशिष्य व्याकृतौ तेषां कौशलं तु प्रकाश्यते । द्वित्राणां हि प्रयोगाणां ज्ञेया स्थालीपुलाकता ॥

'उत्प्रेक्ष्यते बुधजनैरुपपत्तिभूम्ना घण्टा हरेः समजनिष्ट यदात्मनेति', 'तुरगवदनतेजोबृंहिताश्चर्यशक्तिः कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः', 'अन्येन्द्रकं भुवनमन्यदनिन्द्रकं वा कर्तुं क्षमे कविरभूदयमन्ववाये । .... देवी च विश्वजननी यदनन्यगोत्रा' इति स्वेनैव प्रकटितमाहात्म्यानां जगद्विख्यातानां विदितवैभवानामाचार्यसार्वभौमानां कवितार्किकसिंह-सर्वतन्त्र-स्वतन्त्र-वेदान्ताचार्यबिरुदभाजां श्रीमद्वेङ्कटनाथानाम् 'ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति' इतिवत् अनितर-साधारण-व्याकरणप्रयोगाः केचनात्र सङ्गृह्यन्ते बुधास्वादाय ॥

**त्रस्तरी, हस्तालोचशब्दौ, ब्राह्मणशब्दस्य विशिष्टं विवरणं, कुत्रचित् अपशब्दत्वेनान्यैः आपादितस्य तत्प्रयोगे साधुत्वं चात्र निर्दिश्यते ॥**

**१. त्रस्तरी** - एतत् पदम् आचार्यैः अच्चुअसअअम् (अच्युतशतके), तत्त्वमुक्ताकलापे, सर्वार्थसिद्धौ, परमतभङ्गे च प्रयुक्तम् ।

अच्युतशतके यथा -

**तत्थरि णएण ठविआ सोहउ तिअसाण(दासाण) णाह तुज्झ समाए ।**
**वन्दित्तण महिआणं मज्झम्मि सुईण बालिसा मज्झ थुई ॥**

(छाया - त्रस्तरिनयेन स्थापिता शोभतां त्रिदशानां (दासानां) नाथ तव समाजे ।
वन्दित्वमहितानां मध्ये श्रुतीनां बालिशा मम स्तुतिः ॥ ४ ॥

अत्र एकस्यां व्याख्यायाम् - *त्रस्तरिनयेन* - देवालये उत्सवार्थं *पुरोनिर्गमनपुरुषोदूह्यमानकृत्रिमपाञ्चालिकां* त्रस्तरीति वदन्ति । तन्न्यायेन स्थापिता सती, तद्वदापातरमणीया सतीत्यर्थः । कृत्रिमपाञ्चालिकावत् आपातरमणीयत्वेनैव तव शोभावहा, नतु श्रुतिवत् यथावस्थितगुणस्ताविकेति भावः । यद्वा, त्रस्तरिन्यायेन - *हास्यकारिविदूषकोक्तिन्यायेन* शोभताम् इत्यन्वयः । मत्कर्तृकस्तुत्या अचमत्कारित्वेऽपि विदूषकोक्तिवत् हास्यकारित्वेन जामितापरिहारद्वारा त्वत्प्रसादहेतुत्वात् तदारम्भप्रयास उचित एवेति भावः इति ।

श्रीवत्साङ्काचार्याणाम् अपरस्यां द्राविड्यां व्याख्यायाम् - 'विद्वांसः कवयो भट्टाः गायकाः परिहासकाः । इतिहासः पुराणं च सभा सप्ताङ्गलक्षणम्' इतिवत् भगवत्समाजे अनन्वितार्थवक्तुः विदूषकस्यापि हास्यरसापादकत्वेन स्थितिवत् ममापि स्तुतिः शोभताम् ।

श्रीवत्सचिह्नमिश्रकृते यमकरत्नाकरे अष्टमाश्वासे चतुर्थश्लोके 'क्षयिणि जलेऽब्जमलिकृतत्रस्तरि पूष्णोपचित्यै हि । उदगादिव यदनेन त्रस्तरिपूष्णोपचित्यैहि ॥' इत्यस्य व्याख्याने तैः अलिकृतत्रस्तरि इत्यस्य, त्रस्तरी - *नर्मकथा,* अलिभिः कृता त्रस्तरी यस्य तत्तथोक्तमिति विवृतम् । 'त्रस्तरी नर्मकथायाम्' इति प्राकृते निपातितः इति तत्र टिप्पणी ।

अत्रत्य त्रस्तरिशब्दविषये, महाकविवेङ्कटाध्वरिणः सुप्रसिद्धलक्ष्मीसहस्रस्तोत्रस्य, कविगण्डभेरुण्डेत्याद्यनेकबिरुदभूषितैः

श्रीकृष्णब्रह्मतन्त्रस्वतन्त्रपरकालमहादेशिकैः स्वीयविस्तृतव्याख्याने, 'कवीनां प्रत्नानाम्' इतिश्लोकव्याख्यानावसर एवमन्वग्राहि -

मूलं - कवीनां प्रत्नानां कबलितसुधास्वादिममदैरनूचानैस्स्तोत्रैश्श्रुतिजडिमभाजो जननि ते ।
अजामित्वायैव स्तवमिममकूपारतनये! वियाता ग्रथ्नीमो विहसनपदैः कैरपि पदैः ॥ १२ ॥

"अथ स्वभावतः परिहसनीयोऽपि मद्विवक्षितस्तवः पुरातनमहाकविकृतस्तोत्रातिमात्रश्रवणसातत्यजनितचित्त-वैरस्यायाः श्रियः '*तत्थरि णएण ठविआ सोहउ दासाण णाह तुज्झ समाए । वन्दित्तण महिआणं मज्झम्मि सुईण बालिसा मज्झ थुई ॥' छाया - 'त्रस्तरिनयेन स्थापिता शोभतां दासानां नाथ तव समाजे । वन्दित्वमहितानां मध्ये श्रुतीनां बालिशा मम स्तुतिः ॥' इत्याचार्यश्रीसूक्त्यनुरोधेन वैरस्यपरिहरणार्थतया श्राव्य एव भवतीत्यभिसन्धाय पूर्वश्लोकव्यञ्जितप्राज्ञपरिहाससंभावनाकलितस्तुतिकरणशैथिल्यान्निवृत्तो विवक्षितमंशं यथातथा निर्वोढुमभिलष्यन्नाह। कवीनामिति । हे जननि । अनेन वात्सल्यातिशयो व्यञ्जितः । तेनापहसनीयमपि मम वचो भोग्यतयैव गृह्णासीति व्यज्यते । दोषतिरस्कारिणी प्रीतिर्हि वात्सल्यम् । क्वचिज्जनन्या अप्यगम्भीरहृदयत्वेऽपहसनोन्मुखतापि स्यादिति तत्प्रतिक्षेपायाह अकूपारतनये इति । समुद्रपुत्रि । अनेनागाधहृदयता व्यञ्जिता । तेन निमित्तसहस्रसम्भवेऽपि नैवापहससीति व्यज्यते ।" (एतद्ग्रन्थसम्पादकानां श्रीराघवाचार्याणां टिप्पणी तत्रत्या - ''*श्लोकोऽयं प्राकृताच्युत-शतकस्थः श्रीदेशिककृतः । अत्र च 'त्रस्तरिनयेन' इति समासपदे त्रस्तरीशब्दार्थो विचार्यः । आन्ध्रदेश्यं पदमिति आन्ध्रकोशकर्तारः । परिहासार्थतां च ते वदन्ति । किं तु श्रीदेशिकप्रयोगात् संस्कृतशब्दोऽयमिति भाति । एवं सति अच्युतशतकव्याख्याता कविभूषणकुमारतातार्यस्तु, त्रस्तरिनयेन - विदूषकनीत्या इति व्यवृणोत् । न तु कोशं प्रमाणयति । अतः प्रमाणमन्वेष्यम् ॥' इति ।)

----------

<u>तत्वमुक्ताकलापे</u>

४५२. स्वव्यापारं विशेष्ये स्वयमभिदधते नैव शब्दाः कदाचित्
श्रुत्वा लिङ्व्यापृतिं वा कुत इह यतनं स्वोपयोगाद्यबोधे ।
तस्मात्, आस्माकतत्तद्यतनकृत् अभिधा स्वस्य वाच्या लिङादेः
इत्युक्तिं बह्ववद्यामममनिषत बुधाः **त्रस्तरी**मात्ररूपाम् ॥ ९२ ॥

<u>तत्रत्य-सर्वार्थसिद्धौ</u>

"उक्तार्थस्थेम्ने कौमारिलोक्तां शब्दभावनाया लिङ्वाच्यतामुन्मूलयति - स्वव्यापारमिति ॥ लिङ्व्यापारः - शब्दभावना। तामेवाभिदधाति लिङ्प्रत्ययः, लिङ्व्यापारप्रतिपत्तिरेव पुरुषं प्रवर्तयतीति भावनावाक्यार्थवादिनः । अत्रोभयमपि न संघटते । न खलु शब्दाः कदाचिदपि स्वव्यापारं स्वयमेवाभिदधते । अभिधेयानुबन्धिनी खल्वभिधा; अभिधेयाश्च घटादयः । एवं लिङभिधानमप्यभिधेयार्थानुबन्धित्वान्न स्वात्मानं विषयीकरोति । इत्थं लिङ्व्यापारस्वरूपप्रतीतिः प्रवृत्तिं न करोति । नहि लिङ्व्यापार इति बुध्वा कश्चित् प्रयतते; स्वोपयोगादिबोध एव हि सर्वत्र प्रवर्तकः । इत्थमर्थतत्त्वं निष्कृष्य परोक्तप्रक्रिया परिहासमात्रपदमित्याह - तस्मादिति । आस्माकतत्तद्यतनकृत् - अस्मदीय-तत्तद्यागादिप्रयत्नरूपार्थभावनामुत्पादयति केवलं लिङभिधा । शब्दभावना शब्दाभिधेया स्वस्य लिङादेर्वाच्येत्युक्तिं, बह्ववद्यां - श्रुतहानाश्रुतकल्पनानैरर्थक्यादिबहुदोषदुष्टां, बुधास्त्रस्तरीमात्ररूपाममनिषत । **त्रस्तरी - परिहासः** ॥९२॥ इति शब्दभावनाया लिङादिवाच्यत्वभङ्गः ॥" इति ।

**त्रस्तरीमात्ररूपाम् - हास्यरूपाम्, त्रस्तरी परिहास इति वृत्तिः**, इति *पण्डितरत्नं नव्यमङ्गलं वरदाचार्याः* सर्वंकषायां व्याख्यान्ति ॥

अत्रत्य द्राविडव्याख्यायां *विपश्चिन्मणि वासुदेवाचार्याः* त्रस्तरीमात्ररूपामित्यस्य वञ्चनामात्रत्वम् अभिप्रयन्ति । अग्रे परिहासार्थत्वमाचार्योक्तमप्यनुवदन्ति ॥

यद्यप्यत्र त्रस्तरीशब्दस्य परिहासार्थत्वे उपपत्तिः कापि न प्रदर्शिता, तथापि तादृशार्थकल्पनस्य मूलं मृग्यमेव ।

परमतभङ्गे सौत्रान्तिकभङ्गाधिकारे, अनन्वित **त्रस्तरि** कल्पமாய் अपहास्यतमம் इत्युक्तमस्ति ।

तत्रत्य देशिकाशयप्रकाशाख्यव्याख्यायां वेदान्तवावदूकाः नारायणाचार्याः इत्थं व्याचक्षते - "अनन्वितत्रस्तरी(रि) कल्पமாய் इति । एवमेव मातृकासु सर्वासु पाठः दृश्यते । स च कथञ्चिद्व्याख्येयः । विदूषक इति, उद्यानसंरक्षकवृतिगतः क्षुद्रवृक्षविशेषः (மறள்) इति च बहुधा तदर्थं वर्णयन्ति । अथापि प्रकृतानुगुणं विदूषकोक्तिपरत्वमेव युक्तं समाश्रयितुम् । आचार्या अपि अच्युतशतके - (छा) 'त्रस्तरिनयेन स्थापिता शोभतां त्रिदशानां नाथ तव समाजे । वन्दित्वमहितानां मध्ये श्रुतीनां बालिशा मम स्तुतिः ॥' इति इममेव शब्दं एवंप्राय एवार्थे प्रयुञ्जते । *'श‍ृणु गदितमिदं नः त्रस्तरीमात्ररूपम्'* इति क्वचित्कविप्रयोगश्च स्मर्यते । विदूषकवाक्यस्य हास्यरसोत्पादनेन श्रोतृमनोरञ्जनमात्रैदंपर्यशालित्वात् नार्थगौरवमिति अनन्वितत्वोक्तिः ।" इति ॥

अत्र संग्रहस्त्वित्थम् - प्राकृतशब्दत्वेन तत्थरीति पदं प्रयुक्तम् अच्युतशतके । तस्य द्राविड्यां, आन्ध्रे च पुष्टिर्दृश्यते। कृत्रिमपाञ्चालिकेति च व्याख्यातम् । परमतभङ्गे, तत्त्वमुक्ताकलापे सर्वार्थसिद्धौ च संस्कृतपदत्वेन समस्तत्वेन च प्रयुक्तः । स्वयं परिहासार्थत्वं व्याख्यातम् इति शब्दनिष्पत्तिरेव ज्ञेयाऽवशिष्यते । महाकविवेङ्कटाध्वरिणः लक्ष्मीसहस्रेऽपि जामितापरिहारकार्थे एष शब्द उदाहृतः श्रीकृष्णब्रह्मतन्त्रपरकालस्वामिभिः । यमकरत्नाकरे नर्मकथेति व्याख्यातम् । अतः, त्रस्तरिशब्दस्य परिहासार्थप्रयुक्त-अर्थगौरवरहित-अनन्वित-(अविश्वसनीय)-हास्यरसोत्पादक-जामितापरिहारक-नर्मकथा-त्वाद्यर्थत्वं, तथा प्राकृते प्रादेशिकभाषान्तरे पाञ्चालिकादिविभिन्नार्थकत्वं च ग्रहीतुं शक्यते ।

-----------

२. **हस्तालोचः, हस्तसमालोचः** - एष शब्दः न्यायपरिशुद्धौ, सेश्वरमीमांसायाञ्च प्रयुक्तमाचार्यैः ।

न्यायपरिशुद्धौ तावत् – अनुमानाध्यायचतुर्थाह्निकारम्भे -

'महाविद्यादिप्रस्थानेषु केषांचिद्धेतूनां साध्यतदभावयोः समानाकारतया सम्भवं पश्यामः । यथा शब्दः स्वस्वेतरवृत्तित्वानाक्रान्तानित्यनिष्ठाधिकरणं प्रमेयत्वात् घटवदिति शब्दानित्यत्वसाधने प्रवृत्तः प्रमेयत्वहेतुरेक एव । शब्दः स्वस्वेतरवृत्तित्वानाक्रान्तनित्यनिष्ठाधिकरणं प्रमेयत्वात् आकाशवदित्यपि शब्दनित्यत्वस्थापने पूर्ववृत्तिरूप उपलभ्यते । अतः नोदाहरणमादरणीयमिति न्यायाल्लक्षणासंभवोद्यं **हस्तालोचः** ।'

अत्रत्यव्याख्यायां न्यायसारे *श्रीनिवासाचार्यैः* - हस्तालोच इति । करपरामर्श इत्यर्थः । लोच दर्शन इति धातोर्भावे घञि 'निष्ठायामनिट' इति वचनात् 'वजो कुघिण्ण्यतोः' इत्यस्याप्रवृत्त्या कुत्वाभावे रूपं लोच इति हस्तेनालोच इति विग्रहः । तथा च लक्षणासम्भववचनं निमीलिताक्षस्य हस्तपरामर्शमात्रेण दूरस्थवस्त्वभावावधारणप्रायमित्यर्थः। *उत्तमूर् स्वामिभिः* – हस्तालोच इति । हस्तस्पर्शमूलकत्वाचप्रत्यक्षमात्रेण तत्रत्यास्पृष्टवस्त्वन्तराग्रहणेन तदभाववाद-तुल्यमित्यर्थः । इत्युक्तम् ॥

*महामहोपाध्यायैः शठकोपरामानुजताताचार्यैः* - हस्तालोच इति । निमीलिताक्षस्य हस्तपरामर्शमात्रेण दूरस्थवस्त्वभावावधारणप्रायमित्यर्थः । इत्युक्तम् ॥

--------

सेश्वरमीमांसायां प्रथमाध्यायद्वितीयपादे मन्त्राधिकरणे 'बुद्धशास्त्रात्' (१.२.३३) इति पूर्वपक्षसूत्रव्याख्यानावसरे (३३) "अपिच केचिन्मन्त्राः कर्ममध्ये प्रयुज्यमानाः परप्रेषणवन्निगदाः प्रतिपन्नाः साधनरूपा दृश्यन्ते; - यथा 'अग्नीदग्नीन् विहर' इत्येवमादयः । प्रतिपन्नो ह्ययमर्थः पाठमात्रेण । न ह्यनधीतवेदः अविद्वान् कर्मणि नियुज्यते । [अतः] कर्मप्रक्रमात्प्रागेव शिक्षितात्मीयपदार्थम् आग्नीध्रं प्रति प्रैषोऽयमनर्थकः । अथ निश्चितात्मीयपदार्थस्यानुष्ठानकाले स्मरणार्थः प्रैष इति चेन्न; - सादरपटुतरशिक्षितब्राह्मणार्थविज्ञानाभ्यासमहिमसंजनितसंस्कारविशेषादेव तत्प्रसिद्धेः।

संस्कारोद्बोधोऽपि निरन्तरेष्वात्मीयपदार्थेषु पूर्वसमाप्तिमात्रात्, ब्राह्मणवाक्यादेव (द्वा?) सिद्ध्येत् । न च बुद्धे बोधनमर्थवत् । बुद्धेऽप्युच्चारणमदृष्टद्वारेणोपकुरुते, बोधनं तु दृष्टं सिद्धं चेति न साधनमर्हति । ननु संस्कारातिशयाय द्वितीया बुद्धिरुत्पाद्यते; यच्चात्र सोपानत्के पादे द्वितीयोपानत्परिग्रहवत् अशक्यत्वं परैर्भाषितं, पिष्टपेषणं च निदर्शितम् - सोऽपि **हस्तसमालोचः**, वैषम्यात्; शब्दे हि सहस्रशः पठितेऽपि प्रतिपर्यायं बुद्ध्यन्तरोत्पत्तेः - इति चेन्न; - शक्यत्वेऽपि कृतकरत्वस्य दुस्त्यजत्वात् । न हि द्वितीयेन बोधेन प्रथमादधिकमुपकृतम् । अदृष्टं तूच्चारणादेव युक्तमित्युक्तम् ॥ ३ ॥"

(अत्र *उत्तमूर् स्वामिभिः* टिप्पणे, 'कर्मप्रक्रमेति पदं वार्तिकतो ज्ञातम् । परैरिति । शाबरे, 'यथा सोपानत्के पादे द्वितीयामुपानहमशक्यत्वान्नोपादत्ते' इति, वार्तिके , 'पिष्टपेषणन्यायेनार्थं ज्ञापयितुमशक्नुवन्' इति । **हस्तसमालोच** इति । विस्पष्टस्यापि तैरग्रहणमित्यर्थः ।')

------------

**३. ब्राह्मणशब्दनिर्वचनम् -** श्रीभगवद्गीताभाष्यतात्पर्यचन्द्रिकायाम् -

'यावानर्थ उदपाने सर्वतः सम्प्लुतोदके । तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥' (२.४६) इति श्लोकव्याख्याने ब्रह्म अणतीति निरुक्त्या ब्राह्मणशब्दविवरणं कृतमिति समीचीनतया प्रतिपादितम् । तत्रत्यपङ्क्तयः - "ननु *ब्राह्मणस्येतत् प्रकरणासङ्गतम्, क्षत्रियायैव ह्युपदिश्यते । कश्चात्र ब्राह्मणस्य विशेषः, ब्रह्मविद्याया अपि त्रैवर्णिकसाधारणत्वात् । *विजानत इति चायुक्तम्; विजानन्नेव हि कामाधिकारादिष्वपि प्रवर्तते । *ब्राह्मणशब्दश्चात्र न, 'तदधीते' (पा.सू. ४.२.५९) इत्याद्यर्थान्तरपरः 'ब्राह्मोऽजातौ' (पा.सू. ६.४.१७१) इति निपातनेन जातिव्यतिरिक्तार्थेषु ब्राह्म इत्येव वक्तव्यत्वात् । तत्राह - *वैदिकस्य मुमुक्षोरिति । ब्रह्म अणतीति निरुक्त्या ब्राह्मणः 'शकन्ध्वादिषु पररूपं वक्तव्यम्' (पा.सू. ६.१.९४ वा.) इति पररूपे कृते प्रज्ञादित्वादण्प्रत्यये च ब्राह्मण इति रूपं भवति । ब्रह्म चात्र वेदः, वेदेष्विति अत्रैव प्रसक्तत्वात् । अतोऽत्र ब्राह्मणशब्दो वैदिकमात्रपर इति न क्षत्रियार्थोपदेशाद्यनुपपत्तिः । ब्राह्मणशब्दस्यात्र सन्न्यासिपरत्वेन *शङ्करव्याख्या त्वतिमन्दा । 'अमौनं च मौनं च निर्विद्याथ ब्राह्मणः' (बृ.उ. ५.५.१) इति श्रुतिस्तु योगिनः प्रकृष्टतरान्तरसत्त्वम(त्त्वा?)वस्थाविशेषमाह । विजानत इति च विशिष्टज्ञानवत्त्वमुच्यते । विशिष्टत्वं च हेयोपादेय[विभाग]विषयतया । तथाविधज्ञानवांश्च मुमुक्षुरेव स्यादिति ।"

एतदुपरि काभ्याश्चित् अद्वैतिभ्याम् आक्षेपे कृते सति *श्रीमद्भिः उत्तमूर् स्वामिभिः* एवं समाहितम् - "अत्र द्वितीयस्तु वाक्यार्थसौष्ठवमस्मद्भाष्ये मनसिकृत्य खण्डयितुमपारयन् किमप्यत्र वक्तव्यमित्यागृह्य, ब्राह्मणशब्दस्य वैदिकस्येत्यर्थवर्णनमयुक्तं तत्त्वज्ञानरहितवैदिकदर्शनादित्याह ।

इदं तु स्वमतेऽपि तुल्यं, तत्त्वज्ञानरहितस्य ब्राह्मणजातीयस्य संन्यासिनश्च शतशो दर्शनात् । वेदाध्ययनाभावे विज्ञाने उपासने अनधिकारात् । ब्राह्मणव्यतिरिक्तक्षत्रियादेरपि वेदाध्ययनेऽधिकारात्, प्रकृतेऽर्जुनं प्रति निस्त्रैगुण्यो भवेत्युक्त्वा, तव तावानेवार्थः सर्वेषु वेदेष्वित्यस्यैव वक्तव्यतया तवेत्येतत्स्थाने प्रयुक्तस्य ब्राह्मणस्येति पदस्य विप्रवर्णपरत्वायोगाच्चास्मद्भाष्ये सामान्येन वैदिकस्येत्युक्तम् । ब्राह्मणस्यैव संन्यासः, संन्यासिन एव विज्ञानेऽधिकारः इति चेदत्रोच्येत, अर्जुनं प्रति अयमुपदेशो व्यर्थ इति विदांकुर्वन्तु ।

अथ चायं द्वितीयश्चन्द्रिकोक्तं ब्राह्मणशब्दार्थमेव खण्डयति - ब्रह्म अनितीति व्युत्पत्त्या ब्रह्मणः इति शकन्ध्वादिषु पाठकल्पनं ब्राह्मण इति दीर्घत्वाय प्रज्ञादिषु पाठकल्पनश्चायुक्तम्, ब्रह्मण इति प्रथमान्तशब्दप्रयोगादर्शनात् ब्रह्म अनितीति कर्मण्यण्प्रत्यये ब्रह्माण इत्येव प्रयोगप्रसंगाच्चेति । तथा च शांकररामानुजयोर्वाक्यार्थयोः कतरः श्रेयानिति विषयं परित्यज्य ब्राह्मणशब्दव्युत्पत्तिविचारे गतमनेन । अस्तु तत्राप्युच्यते - ब्रह्मानितीति नोक्तं चन्द्रिकायाम्; किं तु ब्रह्म अणतीति । माध्वभाष्येऽप्येवमेव । परं तत्र ब्रह्म-अण इति स्थिते ब्रह्माण इत्येव प्रयोगः स्यात्; न तु ब्राह्मण इति इत्यालोच्य जयतीर्थव्याख्यायां वर्णविपर्ययः (आकारस्य अकारस्य च विपर्ययः) निरुक्तवशादित्युक्तम्॥ चन्द्रिकायां व्याकरणमपि प्रदर्श्यते, शकन्ध्वादेः प्रज्ञादेश्चाऽऽकृतिगणत्वस्य निर्विवादत्वात् तत्र घटनमिति । यत्तु

कर्मण्यणि ब्रह्माण इति स्यादिति, तन्न; अण्प्रत्यय इति चन्द्रिकायामनुक्तेः । पचाद्यच एवात्र सुग्रहत्वात् । षष्ठ्यन्तब्रह्मपदस्य अण इतिपदस्य चैवात्र विग्रह इष्टः । ब्रह्म अणतीति तदर्थानुवादमात्रम् । अस्तु वा कर्मण्यण, तथापि शाब्दिकैः कुलटाशब्दमत्र गृहीत्वा कुल अट इत्यनयोः समासः, न तु कुलमटतीत्युक्त्वा अण्ग्रहणे किमित्याशंक्य कुलटेति टाप् न स्यात्, कि तु ङीप् इत्येवोक्तम्; न तु कुलाटेति दीर्घः स्यादित्यापादितम् । तेन शकन्ध्वादिषु पररूपोक्तावपि कुलमटतीति विग्रहदशायाम् अकारस्यैव श्रवणात् अकारघटितमेव रूपम्; अण्ग्रहणं तु प्रातिपदिकत्वसंपादनायेति न तेनात्र दीर्घापत्तिरित्याशयो ज्ञायते । अस्त्विदं कथमपि । ब्रह्मणः अण इति अच्प्रत्यय एवात्र विवक्षितः ।

यच्चान्यदुक्तम् ब्रह्मण इति प्रथमान्तप्रयोगो नास्तीति, तत्रोच्यते, मा भूत् सः । प्रज्ञादिपाठसंपत्त्यर्थमेव शकन्ध्वादिपाठस्वीकारात्, तथा लोकप्रयोगे सत्येव पाठः कार्य इति निर्बन्धाभावात् । एतदर्थं शाब्दिकैरत्रोदाहृतं मार्तण्डशब्दमधिकृत्य किञ्चिदुच्यते । मार्तण्डशब्दनिष्पत्तिः आकृतिगणतया शकन्ध्वादिषु पाठेनेति शाब्दिकोक्तम् । तस्य व्युत्पत्तिः कथमिति विचार्य मृतण्ड इति कश्चिदृषिः, मृत-अण्ड इति स्थिते शकन्ध्वादिपाठात् मृतण्डः तस्यापत्यं मार्तण्डः इति । अत्रेदं वक्तव्यम् - एवं मृतण्ड इत्येवोदाहरणं क्रियताम्, किं मार्तण्ड इत्युदाहरणेन । अप्रसिद्धमृतण्डर्षिकल्पनमपेक्ष्य एवमत्र सुवचम् - छान्दोग्ये ३.१९ 'आदित्यो ब्रह्मेत्यादेशः' इत्यत्र 'तदाण्डं निरवर्तत; तन्निरभिद्यत । ते आण्डकपाले रजतं सुवर्णश्च । रजतं पृथिवी सुवर्णं द्यौः .... अथ यत्तदजायत स आदित्यः' इति मृतादण्डादादित्योत्पत्तिः प्रत्यक्षं श्रूयते । एवं मृतादण्डादुत्थतयैव मार्तण्ड इति तन्नाम । तत्राण्डस्य तस्य मृतण्डशब्देन व्यवहाराभावेऽपि मार्तण्डशब्द-निष्पत्तिमार्गमात्रं तत् । तस्य पृथगप्रयोक्तव्यत्वादेव मृतण्डेत्युदाहरणं न दत्तं शाब्दिकैः; किं तु मार्तण्डे- त्येब । तत्र मृतण्डेत्यण्डग्रहणेन ततो जात इति वाऽर्थोस्तु, बहुव्रीहिणा मृतण्डशब्देनाप्यादित्यमेव गृहीत्वा प्रज्ञादिभ्योऽणेव वाऽस्तु । तद्वदत्राप्यण् इत्याशयः । अत एव अणतीति व्युत्पत्त्या ब्राह्मण इत्येवोक्तं चन्द्रिकायाम्; न तु ब्रह्मण इति । अतो मार्तण्डवदेव शकन्ध्वादिषु पाठः कार्यः ।

एवं ब्रह्म वेदः; तत्संबन्धि ब्राह्मम् । तत् अणतीति तस्याण् इति वा ब्राह्मण इति प्रज्ञादिपाठं विना शकन्ध्वादिमात्रपाठेनापि निर्वाहः संभवति । अतोऽर्जुनस्य ब्राह्मणत्वं यादृशं क्षत्रियत्वावस्थायामपि संभावितम्, तद्वचनमेवात्र युक्तमिति तदुचितार्थनिर्वाह प्रदर्शनमात्रमेतत् ॥"

----------

'अनितीति अन् । अनिति जीवतीत्यर्थः । क्विबन्तो विजन्तो वाऽयं शब्दः । ब्रह्म अनितीति ब्राह्मणः वेदहृदयज्ञः' - कूरनारायणीये महानारायणोपनिषद्भाष्ये ।

----------

एवं विभिन्नप्रकारेण शब्दप्रयोगे, भाष्योक्तार्थसमर्थने, तथा शास्त्रीयमार्गापरिहाणेन तत्साधने च दृष्टान्ताः आचार्याणां तद्ग्रन्थेषु शतशः समुपलभ्यन्ते । तत्त्वटीकायां स्थेमशब्दव्याख्यानावसरे - नानाव्याकरणाभिज्ञबहुविद्वत्परिग्रहे । शब्दासाधुत्वमाहुर्ये शाब्दिकांस्तान्न मन्महे ॥ इति उदघोषयन् ।

एषां ग्रन्थेषु प्रतिपक्षिभिः असूयाळुभिश्च दोषोद्भावनप्रयासे कृतेऽपि तद्वैफल्यं स्पष्टं दरीदृश्यते ।

**अवैमि** इति प्रयोगस्यासाधुत्वं मन्वानान् प्रति तस्य साधुत्वसमर्थनं सप्रमाणोपपत्ति बहुभिः अस्मदीयैः विद्वद्भिः कृतम् । एवमेव यतिराजसप्ततौ **प्रस्नुवीत** इत्यस्य, तथा दशावतारस्तोत्रे **विवक्षेत** इतिप्रयोगस्य असाधुत्वापादने कृते तत्रत्यात्मनेपदसमर्थनं कृतमेव ।

'स्तोतुं निन्दितुमस्मदुक्तिमथवा सोढुं समूढं जगत् किन्नश्छिन्नमनन्तचिन्तनरसे सुस्थे सुखं तस्थुषाम् ।' इति वदद्भिराचार्यवर्यैः स्वस्य स्थितप्रज्ञत्वं परमैकान्तिसार्वभौमत्वं च प्रख्यापितमस्ति । अतः तदीयग्रन्थान् सभक्तिश्रद्धं अधीत्य उत्तमज्ञानभक्त्यादियुक्ता भवेम इति शम् ॥

शुभमस्तु ॥